**गङ्गाक्षेत्र** न० ६त० । "तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते" इत्युक्ते गङ्गातीराडुभयपार्श्वस्थक्रोशद्वयमितस्थाने ।

**गङ्गाचिल्ली** स्त्री गङ्गास्था नदीस्था चिल्ली । चिल्लभेदे [ (गाँगचिल) ख्याता० ।

**गङ्गाज** पु० गङ्गातो जायते जन—ड । १भीष्मे २कार्त्तिकेये च तत्र भीष्मस्य गङ्गातो जन्मकथा ।

"स राजा शान्तनुर्धीमान् देवराजसमद्युतिः । बभूव मृगयाशीलः सततं वनगोचरः । स मृगान् महिषांश्चैव विनिघ्नन्राजसत्तमः । गङ्गामनुचचारैकः सिद्धचारणसेविताम् । स कदाचिन्महाराज ! ददर्श परमां स्त्रियम् । जाज्वल्यमानां वपुषा साक्षाच्छ्रियमिवापराम् । सर्वानवद्यां सुदतीं दिव्याभरणभूषिताम् । सूक्ष्माम्बरधरामेकां पद्मोदरसमप्रभाम् । तां दृष्ट्वा हृष्टरोमाऽभूद्विस्मितो रूपसम्पदा । पिबन्निव च नेत्राभ्यां नातृप्यत नराधिपः । सा च दृष्ट्वैव राजानं विचरन्तं महाद्युतिम् । स्नेहादागतसौहार्द्दा नातृप्यत विलासिनी । तामुवाच ततो राजा सान्त्वयन् श्लक्ष्णया गिरा । देवी वा दानवी वा त्वं गन्धर्वी वाथ वाप्सराः । यक्षी वा पन्नगी वापि मानुषी वा सुमध्यमे ! । याचे त्वां सुरगर्भाभे ! भार्य्या मे भव शोभने !" भा० आ० ९७अ० ।

"एतत् श्रुत्वा वचो राज्ञः सस्मितं मृदु वल्गु च । वसूनां समयं स्मृत्वाऽथाभ्यागच्छदनिन्दिता । उवाच चैवं राज्ञः सा ह्लादयन्ती मनो गिरा । भविष्यामि महीपाल ! महिषी ते वशानुगा । यत्तु कुर्य्यामहं राजन् ! शुभं वा यदि वाऽशुभम् । न तद्वारयितव्यास्मि न वक्तव्या तथाऽप्रियम् । एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव ! । वारिता विप्रियञ्चोक्ता त्यजेयं त्वामसंशयम् । तथेति राज्ञा सा तूक्ता तदा भरतसत्तम ! । प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम् । आसाद्य शान्तनुस्ताञ्च बुभुजे कामतो वशी । न प्रष्टव्येति मन्वानो न स तां किञ्चिदूक्तवान् । स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च । उपचारेण च रहस्तुतोष जगतीपतिः । दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी । मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी । भाग्योपनतकामस्य भार्य्येवोपस्थिताऽभवत् । शान्तनोराजसिंहस्य देवराजसमद्युतेः । सम्भोगस्नेहचातुर्य्यैर्हावलास्यमनोहरैः । राजानं रमयामास तथा रेमे तथैव सः । स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः । संवत्सरानृतून् मासान् बुबुधे न बहून् गतान् । रममाणस्तया सार्द्धं यथाकामं नरेश्वरः । अष्टावजनयत् पुत्रांस्तस्याममरसन्निभान् । जातं जातं च सा पुत्रं क्षिपत्यम्भसि भारत ! । प्रीणामि च त्वामित्युक्त्वा गङ्गास्रोतस्यमज्जयत् । तच्च तस्य प्रियं राज्ञः शान्तनोरभवत्तदा । न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः । अथैनामष्टमे पुत्रे जाते प्रहसतीमिव । उवाच राजा दुःखार्त्तः परीप्सन् सुतमात्मनः । मा वधीः कासि कस्यासि किञ्च हंसि सुतानिति । पुत्रघ्नि ! सुमहत् पापं संप्राप्तं ते विगर्हिते ! । स्त्र्युवाच । पुत्रकाम ! न ते हन्मि पुत्रं पुत्रवतां वर ! । जीर्णोऽस्तु मम वासोऽयं यथा स समयः कृतः । अहं गङ्गा जह्नुसुता महर्षिगणसेविता । देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह । इमेऽष्टौ वसवो देवा महाभागा महौजसः । वशिष्ठशापदोषेण मानुषत्वमुपागताः । तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते । मद्विधा मानुषी धात्री लोके नास्तीह काचन । तेषाञ्च जननीहेतोर्मानुषत्वमुपागता । जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽक्षयाः । देवानां समयस्त्वेष वसूनां संश्रुतो मया । जातं जातं मोक्षयिष्ये जन्मतो नानुषादिति । तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः । स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम् । एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः । मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्" ९८अ० ।

"स कदाचिन्मृगं विद्धा गङ्गामनुसरन्नदीम् । भागीरथीमल्पजलां शान्तनुर्दृष्टवान्नृपः । तां दृष्ट्वा चिन्तयामास शान्तनुः पुरुषर्षभः । स्यन्दते किं त्वियं नाद्य सरिच्छ्रेष्ठा यथा पुरा । ततो निमित्तमन्विच्छन्ददर्श स महामनाः । कुमारं रूपसम्पन्नं बृहन्तञ्चारुदर्शनम् । दिव्यमस्त्रं विकुर्वाणं यथा देवं पुरन्दरम् । कृत्स्नां गङ्गां समावृत्य शरैस्तीक्ष्णैरवस्थितम् । तां शरैराष्टतां दृष्ट्वा नदीं गङ्गां तदन्तिके । अभवद्विस्मितो राजा दृष्ट्वा कर्मातिमानुषम् । जातमात्रं पुरा दृष्ट्वा तं पुत्रं शान्तनुस्तदा । नोपलेभे स्मृतिं धीमानभिज्ञातुं तमात्मजम् । स तु तं पितरं दृष्ट्वा मोहयामास मायया । संमोह्य तु ततः क्षिप्रं तत्रैवान्तर-